सटीक-

# ाद्वादशकमूलम्

मद्भक्तिविनोदठक्कुर-विरचितं

शितिकण्ठवाचस्पति-विरचित-टीका-सहितं

परिव्राजकाचार्य अष्टोत्तरशतश्री ॐ विष्णुपाद

क्तिसिद्धान्तसरस्वतीगोस्वामि-

महाराज-सम्पादितम्





ार्यां १म संख्याक उल्टाडिङ्गि जंसन रोडस्थित

श्रीगौड़ीयमठतः

पत्र-गौड़ीय-सम्पादक श्रीसुन्दरानन्द विद्या-

विनोदेन प्रकाशितम् ।


करणम् ] [ भैक्ष्यमानकचतुष्टयम्

श्रीकृष्णचैतन्यचन्द्रो विजयतेतमाम्

# सटीक-शिक्षादशकमूलम्

—— —— :※: ——

आम्नायः प्राह तत्त्वं हरिमिह
परमं सर्वशक्तिं रसाब्धिं
तद्भिन्नांशांश्च जीवान् प्रकृति-
कवलितान् तद्विमुक्तांश्च भावात् ।
भेदाभेदप्रकाशं सकलमपि
हरेः साधनं शुद्धभक्तिं
साध्यं यत्प्रीतिमेवेत्युपदिशति
हरौ गौरचन्द्रं भजे तम् ॥ १ ॥

अधुना समासेन श्रीगौरचन्द्रोपदिष्टं तत्त्वं वदति आम्नाय प्राह तत्त्वमिति । तं गौरचन्द्रं भजे । यः आम्नायः प्राह तत्त्वमिति वाक्येन आम्नायस्य प्रमाणत्वं एवञ्च तदुदितानि नवविधानि प्रमेयाणि उपदिशति । प्रमेयाणि यथा । प्रथमं हरिरेवैक तत्त्वं द्वितीयं स हरिः सर्वशक्तिविशिष्टः । तृतीयं स हरिर्निखिलरस-समुद्रः । चतुर्थं जीवास्तु हरेर्विभिन्नां-

शकाः । पञ्चमं जीवानां केचन प्रकृतिकवलिताः । षष्ठं जीवानां केचन प्रकृतिविमुक्ताः । सप्तमं चराचर विश्वन्तु हरेरचिन्त्य-भेदाभेदप्रकाशमात्रम् । अष्टमं शुद्ध-भक्तिरेव बद्धजीवस्य प्रयोजनसाधनम् । नवमञ्च भगवत्प्रीतिरेव प्रयोजनरूपं साध्यतत्त्वम् । श्लोकेऽस्मिन् श्रीकृष्णचैतन्योपदिष्टं सम्बन्धाभिधेयप्रयोजनात्मकं तत्त्वं सूचितम् ॥ १ ॥

स्वतः सिद्धो वेदो हरिदयितवेधः प्रभृतितः
प्रमाणं सत्प्राप्तं प्रमितिविषयान् तान्नवविधान् ।
तथा प्रत्यक्षादिप्रमितिसहितं साधयति नः
न युक्तिस्तर्काख्या प्रविशति तथा शक्तिरहिता ॥२॥

अथ तदप्राकृतदशमूलं तत्त्वं विशिनष्टि दशश्लोकैः । स्वतःसिद्ध इति । अस्य महतो भूतस्य निश्वसितमेतत् ऋगित्यादि वचनेन वेद एव स्वतःसिद्धप्रमाणम् । तत्र ब्रह्मा देवानां प्रथमः सम्बभूवेत्यादि मुण्डकवाक्यानुसारेण भगवत्प्रियानुचर ब्रह्मप्रभृतितः यानि वेद-वाक्यानि शिष्टसम्प्रदाये प्राप्तानि तान्येव वेदपद-वाच्यानि, नान्यानि कल्पितवचनानि । तानि स्वतःसिद्धवेदवचनानि प्रत्यक्षादिप्रमाणसहकारेण नः अस्माकं सम्बन्धे तानि नवविधानि प्रमेयाणि साध-

वन्ति । तथाच श्रीजीवविरचिततत्त्वसन्दर्भः । तत्र पुरुषस्य भ्रमादिदोषचतुष्टयदुष्टत्वात् सुतरामचिन्त्यालौकिकवस्तुस्पर्शायोग्यत्वाच्च तत्प्रत्यक्षादीन्यपि सदोषाणि ततस्तानि न प्रमाणानीत्यनादिसिद्धपुरुषपरम्परासु सर्वलौकिकालौकिकज्ञाननिदानत्वादप्राकृतवचनलक्षणो वेद एवास्माकं सर्वातीत सर्वाश्रय सर्वाचिन्त्याश्चर्य स्वभावं वस्तुविविदिषतां प्रमाणम् । तच्चानुमतं "तर्काप्रतिष्ठानादित्यादौ । अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेदित्यादौ । शास्त्रयोनित्वादित्यादौ । श्रुतेश्च शब्दमूलत्वादित्यादौ । ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासं पुराणं पञ्चमं वेदानां वेदमित्यादि । तदेवमितिहासपुराणयोर्वेदत्वं सिद्धम् । ब्रह्मसूत्रभाष्यरूपस्य सर्ववेदान्तसारभूतस्य मूढ़जनानादृतस्य श्रीमद्भागवतस्य तु सर्वपुराणश्रेष्ठत्वं प्रतिपादितं तत्रैव ॥ अतः श्रीकृष्णचैतन्यशिक्षया स्वतःसिद्धवेदवाक्यानि तदर्थनिर्णायकपुराणेतिहासवचनानि तथा वेदानुगतप्रत्यक्षादिप्राप्तज्ञानमपि परमार्थनिर्णये प्रमाणमिति स्पष्टीकृतम् । वेदविरुद्धतर्कस्तु अचिन्त्यविषये न योग्यः । अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् । प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य

लक्षणम् । स्वल्पापि रुचिरेव स्यात् भक्तितत्त्वावबोधिका । युक्तिस्तु केवला नैव यदस्या अप्रतिष्ठता । यत्नेनापादितोऽप्यर्थः कुशलैरनुमातृभिः । अभियुक्ततरैरन्यैरन्यथैवोपपाद्यत इत्यादि शास्त्रवचनात् ॥ २ ॥

हरिस्त्वेकं तत्त्वं विधिशिवसुरेशप्रणमितः
यदेवेदं ब्रह्मोपनिषदुदितं तत्तनुमहः ।
परात्मा तस्यांशो जगदनुगतो विश्वजनकः
स वै राधाकान्तो नवजलदकान्तिश्चिदुदयः ॥ ३ ॥

स्वतःसिद्धो वेद इति श्लोकेन प्रमाणरूपं प्रथमतत्त्वं प्रदर्शयन् नवविधानि प्रमेयाणि विशदयति नवश्लोकैः हरिस्त्वेकमिति । तत्र हरिमिह परमं तत्त्वमादौ दर्शयति । विधि-शिव-सुरेश-प्रणमितो हरिरेव एकं तत्त्वम् । स तु नवजलदकान्तिश्चिदुदयः राधाकान्तः श्रीकृष्णचन्द्र एव । उपनिषदुदितं यद्ब्रह्म इदमेव तस्य राधाकान्तस्य तनुमहः अङ्गकान्तिः । तस्य भासा सर्वमिदं विभाति इति वचनेन, सर्वं खल्विदं ब्रह्म इत्यादि वचनेन च तस्य भगवतो भासा इदं सर्वं ब्रह्मलक्षणं वस्तु विभातीति सिद्धं भवति । यस्तु जगदनुगत विश्वजनकः परमात्मा सोऽप्यस्य कृष्णस्य अंश एव । कृष्णस्तु भगवान् स्वयमिति

सिद्धम् । भगशब्दार्थस्तु ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गनेति । अतएव श्रुतौ च । पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ श्रीकृष्णस्वरूपं तु सर्वाद्भुतचमत्कारलीलाकल्लोलवारिधिः । अतुल्यमधुरप्रेममण्डितप्रियमण्डलः । त्रिजगन्मानसाकर्षी मुरलीकलकूजितः । असमानोर्द्ध रूप श्रीविस्मापित चराचर इत्यादि सिद्धान्तवाक्येन अप्राकृतस्वरूपस्य भगवतः सर्वोर्द्ध सीमापरिचयः । तथा च भगवत्सन्दर्भे । खलु स्वरूपभूतभेदविशेषमननुसन्धायायत्तस्वरूपमात्रं तदानीं अवशिष्टं भवति तदेव ब्रह्माख्यम् । तच्च विशेष्यमात्रम् । स्वरूपशक्तिविशिष्टेन वैकुण्ठस्थेन श्रीभगवता पृथगिव तत्रानुभूयते । तदेव निर्विशेषत्वेन स्पर्शरूपादिरहितस्यापि तस्य भगवत्प्रभारूपमुत्प्रेक्ष्य तदभिन्नत्वेन ब्रह्मत्वं व्यपदिष्टम् । ततः स्पर्शरूपादिमाधुरीधारितया सविशेषस्य साक्षात् भगवदङ्ग ज्योतिषः सुतरामेव तत्सिध्यति । तथाच परमात्मसन्दर्भे । यद्यपि परमात्मत्वं वैकुण्ठेऽपि प्रभोरपि । तदपि च भगवत्ताङ्गं तत्स्यादित्थं जगद्गतं वाच्यम् । सर्वान्तर्यामिपुरुष एव

ब्रह्मे ति परमात्मेत्यादौ परमात्मत्वेन निर्दिष्टः । अस्य परमात्मनो मायोपाधितया पुरुषत्वं तूपचरितमेव। श्रुतयोप्येनं शुद्धत्वेनैव वर्णयन्ति। एको देवः सर्व भूतेषु गूढ़ः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेताः केवलो निर्गुणश्च। अथास्याविर्भावे योग्यता प्राग्वत् भक्तिरेव ज्ञे या (ज्ञान-मिश्रा भक्तिः) आविर्भावस्तु त्रिधा। विष्णोस्तु त्रीणि रूपाणि पुरुषाख्याण्यथो विदुः। प्रथमं महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितम्। तृतीयं सर्वभूतस्थं तानि ज्ञात्वा विमुच्यते। तत्र प्रथमो यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति स ऐक्षतेत्याद्युक्तेः। अयमेव सङ्कर्षण इति महाविष्णुरितिच। अथ द्वितीयः पुरुषस्तत् सृष्ट्वा तदेवानुप्राविशदित्याद्युक्तेः समष्टि जीवान्तर्यामी तेषां ब्रह्माण्डत्मकानां वहुभेदाद्बहुभेदः। तृतीयोऽपि पुरुषो "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते"। एकस्तयोः खादति पिप्पलान्नमन्यो निरश्नन्नभिचाकशीतीत्याद्युक्तोव्यष्ट्यन्तर्यामी तेषां भेदाद्बहुभेदा इति॥ कोऽसौ हरिरिति प्रश्नोत्तरे श्रुतिश्च। स ब्रह्मणा विसृजति। स रुद्रे ण विलापयति सोऽनुत्पत्तिरलय एक एव हरिः परः परमानन्द इति। एकं सन्तं

बहुधा दृश्यमानमिति च । श्यामाच्छवलं प्रपद्ये शवलाच्छ्यामं प्रपद्य इति छान्दोग्यवचनेन श्रीराधावल्लभस्य मुक्तोपास्यत्वमपि श्रूयत इति । अतएव निष्कर्षः । अद्वयज्ञानात्मकं तत्त्वं विविदिषतां ज्ञानयोगेन अतन्निरसनप्रक्रियया निर्विशेषब्रह्म एव प्रथमा प्रतीतिः । सूक्ष्मस्थूलानुसन्धानरूपाष्टाङ्गयोगेन समाधिसाधनप्रक्रियया अवतारनिदानात्मकपरमात्मैव द्वितीया प्रतीतिः । विशुद्धभक्तियोगेन तद्वस्त्वनुग्रहसाधन प्रक्रियया भगवानेव तृतीया प्रतीतिः । स भगवान् सान्द्रसच्चिदानन्दैकरूपः स्वरूपभूताचिन्त्यविचित्रानन्तशक्तियुक्तः । धर्म्मत्व एव धर्म्मित्वं निर्भेद एव नानाभेदवत्त्वम् । निर्विशेष एव सविशेषत्वं परमैश्वर्य एव परममाधुर्यवत्वं अरूपित्व एव सरूपित्वं अप्राकृतत्व एव प्रपञ्चविजयित्वं व्यापकत्व एव मध्यमत्वं सत्यमेवेत्यादि परस्परविरुद्धानन्तगुणनिधिः । स्थूलसूक्ष्म विलक्षणस्वप्रकाशाखण्डस्वस्वरूपभूतब्रह्मपरमात्माश्रयात्मकरूपनित्यश्रीविग्रहविशिष्टः । स्वानुरूपस्वरूपशक्त्या विभावलक्षणश्रीसुशोभितवामांशः । स्वरूपशक्ति विलासलक्षणाद्भुतगुणलीलादिमयः परमपुरुषः । मायिकब्रह्माण्डातीतविशुद्धचिन्मयनिजधामसु

विराजमानोऽपि लीलया स्वरूपशक्तिबलेनवैकुण्ठहेयप्रतिच्छविरूपप्रापञ्चिकजगति स्वेन धाम्ना स्वपरिकरेण भक्तानुग्रहतत्पर: सन्नाविर्भवति क्रीड़ति च। "कृष्णस्तु भगवान् स्वयं, कृष्णो परमपुरुष इत्यादिना कृष्णधाम, कृष्णरूप, कृष्णपरिकर, कृष्णलीलादि सर्वं अचिन्त्य चिन्मयव्यापारविशेष: । चित्कणत्वात् तदीय जीवोऽपि तद्द्रष्टुं तल्लीलां प्रवेष्टुं शक्तो भवति तदनुग्रहात् । कृष्णतत्त्वानभिज्ञास्तु प्राकृतबुद्ध्या तदनादृत्य जड़व्यतिरेकबुद्धिसञ्जातब्रह्मतत्त्वं, जड़प्रविष्टांशरूपपरमात्मतत्त्वं जड़शक्तितत्त्वादिकञ्च बहुमानयन्तस्तन्मतवादादिषु परिभ्रमन्ति यावत् पूर्वसुकृतबलेनाधुनिक सत्सङ्गबलेन च विशुद्धकृष्णभजनाधिकारं न लभन्ते ॥ ३ ॥

परारूयाया: शक्तेरपृथगपि स स्वे महिमनि
स्थितो जीवाख्यांस्वामचिदभिहितां तां त्रिपदिकाम् ।
स्वतन्त्रेच्छः शक्तिं सकलविषये प्रेरयति यो
विकाराद्यै: शून्य: परमपुरुषोऽसौ विजयते ॥ ४ ॥

श्रीहरे: सर्वशक्तित्वं दर्शयति पराख्याया इति। स भगवान् कृष्णचन्द्र: । स्वस्य पराख्यशक्तेरपृथगपि । शक्तिशक्तिमतोरभेद इति न्यायात् शक्तितो न पृथक् ।

स्वीयाभेदाखण्डमहिमनि स्थितोपि। तामेकां चिद्चित् जीवक्रियाभेदेन त्रिरूपिकां शक्तिं तत्तद्विषये स्वतन्त्रेच्छया प्रेरणपरः स्वयं स्वेच्छामयः परमपुरुषः तच्छक्तिविकारास्पृष्टः सन् विजयते। शक्तिशक्तिमतोर्मध्ये कस्य प्राधान्यमिति संशयोऽत्र विद्यते जड़धियाम्। जड़बुद्धयस्तु शक्तेः प्राधान्यं स्थापयन्ति शक्तिं विना शक्तिमद्वस्तुनः प्रतीतिर्नास्तीति वाङ्मात्रोद्भावनया। शक्तिस्तु धर्म्मविशेषः। शक्तिमत्तत्त्वस्येच्छां विना शक्तिक्रिया न सिध्यति। "स ऐक्षत स इमान् असृजत इति श्रुतेः। मयाध्यक्षेण प्रकृतिः सूयते सचराचरमिति स्मृतेश्च। लोकेऽपि वस्तुशक्तिः सर्व्वत्रैव वर्त्तते। अविचालिता सा तु जड़वत्क्रियाहीना। चलक्रियायां मूलतश्चैतन्यवस्त्वेव कारणम्। शक्तेरिच्छाशक्तिरस्तीतिवचनं निरर्थक वागाडम्बरमात्रम्। इच्छा तु शक्तिवत् शक्तिमच्चैतन्यवस्तुनो धर्म्मान्तरमिति ज्ञेयम्। अतश्चैतन्यात्मक कृष्णस्तु स्वतन्त्रेच्छइति वाक्यप्रयोगः सार्थकः। श्रुतौ पराशक्तिर्वर्ण्यते। न तस्य कार्य्यं करणञ्च विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकीज्ञानबलक्रियाचेति।

तत्रैव चित्पदिका वर्ण्यते। ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढाम् । यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येक इति। तत्रच जीवपदिका वर्ण्यते। अजामेकां लोहितकृष्ण-शुक्लां वह्वीः प्रजाः सृजमानां स्वरूपाम्। अजो ह्येको जुषमाणोनुशेते जहात्येनां भुक्तभोगामजोन्य इति। तत्र चाचित्पदिका वर्ण्यते। छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदा वदन्ति। यस्मान्मायी सृजते विश्वमेतच्च तस्मिंश्चान्यो माययासन्निरुद्ध इति। भग-वत्सन्दर्भे। शक्तिश्च सा त्रिधा। अन्तरङ्गा तटस्था वहिरङ्गा च। तत्रान्तरङ्गया स्वरूपशक्त्याख्यया पूर्णेनैव स्वरूपेण वैकुण्ठादिस्वरूपवैभवरूपेण चावतिष्ठते। तट-स्थया रश्मिस्थानीयचिदेकात्मशुद्धजीवरूपेण। वहिरङ्गया मायाख्यया प्रतिच्छविगतवर्णशावल्यस्थानीय तदीयवहि-रङ्गवैभवजड़ात्मप्रधानरूपेण च। इति एकमात्रतत्त्वस्य चतुर्धात्वम्। तदेवं सर्वाभिर्मिलित्वा चिदचिच्छक्ति-र्भगवान्। स च भगवान् विकाराद्यैः शून्यः परमपुरुष एव, यथा भागवते। यस्मिन् विरुद्धगतयो ह्यनिशं पतन्ति विद्यादयो विविधशक्तय आनुपूर्व्या। तद्ब्रह्मविश्वभवमेक-मनन्तमाद्यमानन्दमात्रमविकारमहं प्रपद्ये इति ॥ ४ ॥

स वै ह्लादिन्याश्च प्रणयविकृतेर्ह्लादनरतः
तथा संविच्छक्तिप्रकटितरहो भावरसितः ।
तथा श्रीसन्धिन्या कृतविशदतद्धामनिचये
रसाम्भोधौ मग्नो व्रजरसविलासो विजयते ॥३॥

श्रीहरेर्निखिलरसाधारत्वं विशदयति स वै ह्लादिन्याश्चेति । सः श्रीकृष्णः स्वरूपशक्तेर्ह्लादिनीवृत्तेः प्रणयविकृतिकृत ह्लादनव्यापारे रतः । पुनः तच्छक्तेः संवित्वृत्तिप्रकटित-प्रकाशितरहस्यानां भावेन रसितः । पुनश्च तच्छक्तेः सन्धिनीवृत्तिकृत तदुपयोगि चिद्धामनिचये रसाम्भोधौ रससमुद्रे मग्नो भूत्वा व्रजरसविलासी सन् विजयते । रसो वै सः । रसं ह्येवायं लब्ध्वानन्दी भवति । को ह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात् । एष ह्येवानन्दयति । इत्यादि श्रुतिषु तस्य ह्लादिनी शक्तिपरिचयः । प्रज्ञानं ब्रह्म, सत्यं ज्ञानमनन्तं ब्रह्म इत्यादि वेदवचनेषु तस्य संविच्छक्तिपरिचयः । दिव्ये ब्रह्मपुरे ह्येष संव्योम्न्यात्मा प्रतिष्ठित इत्यादि वाक्येषु सन्धिनीशक्तिपरिचयो द्रष्टव्यः । भगवत्सन्दर्भे । अथैकमेव स्वरूपं शक्तित्वेन शक्तिमत्वेन च विराजते । यस्य शक्तेः स्वरूपभूतत्वं निरूपितं तच्छक्तिमत्त्वप्राधान्येन विराजमानं भगव-

त्संज्ञामाप्नोति । एकस्यैव तत्त्वस्य सत्वाच्चित्वादानन्दत्वात् शक्तिरप्येका त्रिधा भिद्यते । तदुक्तं श्रीविष्णुपुराणे "ह्लादिनी सन्धिनी संवित् त्वय्येका सर्वसंस्थितौ । ह्लादतापकरी मिश्रा त्वयि नो गुणवर्जिते ॥ तत्र ह्लादकरूपोऽपि भगवान् यया ह्लादते ह्लादयति च सा ह्लादिनी । तथा सत्तारूपोपि यया सत्तां दधाति धारयति च सा सन्धिनी । एवं ज्ञानरूपोऽपि यया जानाति ज्ञापयति च सा संविदिति ज्ञेयम् । तदेवं तस्यास्त्रयात्मकत्वे सिद्धे येन स्वप्रकाशतालक्षणेन तद्वृत्तिविशेषेण स्वरूपं वा स्वयं स्वरूपशक्तिर्वा विशिष्टं वाविर्भवति तद्विशुद्ध सत्वम् । तच्चान्यनिरपेक्षस्तत्प्रकाश इति ज्ञापनज्ञानवृत्तिकत्वात् संविदेव । अस्य मायया स्पर्शाभावाद्विशुद्धसत्त्वम् । तत्र चेदमेव सन्धिन्यंशप्रधानंचेदाधारशक्तिः । संविदंशप्रधानमात्मविद्या । ह्लादिनी सारांशप्रधानं गुह्यविद्या । युगपच्छक्तित्रयप्रधानं मूर्त्तिः । अत्राधारशक्त्या भगवद्धाम प्रकाशते । अथ मूर्त्त्या परतत्त्वात्मकः श्रीविग्रहः प्रकाशते । एवम्भूतानन्तवृत्तिका या स्वरूपशक्तिः सात्विह भगवद्धामांशवर्त्तिनी मूर्त्तिमती लक्ष्मीरेव । तत्त्वसन्दर्भे । ननु माया खलुशक्तिः । शक्तिश्च

कार्यक्षमत्वं तच्च धर्म्मविशेषः । तस्य कथं लज्जादिकम् । उच्यते । एवं सत्यपि तासां शक्तीनामधिष्ठातृदेव्यः श्रूयन्ते । यथा केनोपनिषदि महेन्द्रमाययोः संवादः । रसविचारः श्रीभक्तिरसामृतसिन्धौ । विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः । स्वाद्यत्वं हृदिभक्तानामानीता श्रवणादिभिः । एषा कृष्णरतिः स्थायी भावो भक्ति रसो भवेत् । तत्र ज्ञेया विभावास्तु रत्यास्वादन-हेतवः । ते द्विधालम्बना एके तथैवोद्दीपनापरे ॥ कृष्णश्च कृष्णभक्ताश्च बुधैरालम्बना मताः । रत्यादे-र्विषयत्वेन तथाधारतयापि च । उद्दीपनास्तु ते प्रोक्ता भावमुद्दीपयन्ति ये । ते तु श्रीकृष्णचन्द्रस्य गुणाश्चेष्टाः प्रसाधनम् । अनुभावास्तु चित्तस्थ भावानामवबोधकाः । ते वहिर्विक्रियाप्रायाः प्रोक्ता उद्भास्वराख्यया । नृत्यं विलुठितं गीतं क्रोशनं तनुमोटनम् । हुङ्कारो जृम्भणं श्वासभूमालोकानपेक्षिता । लालास्रावोऽट्टहासश्च घूर्णा हिक्कादयोऽपि च । कृष्णसम्बन्धिभिः साक्षात् किञ्चिद्वा व्यवधानतः । भावैश्चित्तमिहाक्रान्तं सत्वमित्युच्यते बुधैः । सत्वादस्मात् समुत्पन्ना ये भावास्ते तु सात्विकाः । चित्तं सत्वीभवत्प्राणे न्यस्यत्यात्मा-नमुद्भटम् । प्राणस्तु विक्रियां गच्छन्देहं विक्षो-

भयत्यलम् । तदा स्तम्भादयो भावा भक्तदेहे भवन्त्यमी ॥ ते स्तम्भ स्वेदरोमाञ्चाः स्वरभेदोऽथ वेपथुः । वैवर्ण्य मश्रुप्रलय इत्यष्टौ सात्विकाः स्मृताः । अथोच्यन्ते त्रयस्त्रिंशद्भावा ये व्यभिचारिणः । विशेषेणाभिमुख्येन चरन्ति स्थायिनं प्रति । वागङ्ग सत्यसूच्या ये ज्ञेयास्ते व्यभिचारिणः । सञ्चारयन्ति भावस्य गतिं सञ्चारिणोपि ते । उन्मज्जन्ति निमज्जन्ति स्थायिन्य मृतवारिधौ । उर्म्मिवद्वर्धयन्त्येनं यान्ति तद्रूपताञ्च ते । निर्वेदोऽथ विषाददैन्यं ग्लानि श्रमौ च मदगर्वौ । शङ्कात्रासावेगा उन्मादापस्मृती तथा व्याधिः । मोहमृतिरालस्य जाड्यं व्रीड़ावहित्था च । स्मृतिरथवितर्क-चिन्तामति-धृतयो-हर्षौत्सुकत्वञ्च । औग्र्यामर्षासूयाश्चापल्यञ्चैव निद्रा च । सुप्तिर्बोध इतीमे भावा व्यभिचारिणः समाख्याताः ॥ अथ स्थायीभावः । अविरुद्धान् विरुद्धांश्च भावान् यो वशतां नयन् । सुराजेव विराजेत स स्थायीभाव उच्यते । स्थायीभावोऽत्र स प्रोक्तः श्रीकृष्णविषया रतिः । परमानन्द तादात्म्याद्रत्यादेरस्य वस्तुतः ॥ रहस्य स्वप्रकाशत्वमखण्डत्वञ्च सिध्यति । तथाप्युज्ज्वल नीलमणौ । स्याद्दृढेयं रतिः प्रेम्णा प्रोद्यन् स्नेहः क्रमादयम् । स्यान्मानः

प्रणयो रागोऽनुरागो भाव इत्यपि ॥ बीजमिक्षुः स च रसः स गुड़ः खण्ड एव सः । स शर्करा सिता सा च सा यथा स्यात् सितोत्पला ॥ एतेन रस-समुद्रस्य कृष्णस्य रसलीला सङ्केतेन वर्णिता । रसो वै स इति श्रुत्युक्तया कृष्ण एव परम रसः ॥ स तु नित्यमखण्डत्वेऽपि रसरूपेण विचित्रलीलापरः । प्रकटा-प्रकटभेदेन लीलापि द्विविधा । अप्रकटलीलाया नित्य-वर्त्तमानत्वे न भूतभविष्यद्विभागः कालातीतत्वात्तस्याः । प्रकटलीलावर्णनं तु कृतिसाध्यम् । तदपि अतलत्वा-दपारत्वादातोऽसौ दुर्विगाहताम् । स्पृष्टः परं तटस्थेन रसाब्धिर्मधुरो यथा । एतत्सर्वं भक्तिपूतचेतसावेदि-तव्यं न तु युक्तिविचारेण ॥ ५ ॥

स्फुलिङ्गा ऋद्धाग्नेरिव चिदणवो जीवनिचया
हरेः सूर्यस्यैवापृथगपि तु तद्भेदविषयाः ।
वशे माया यस्य प्रकृतिपतिरेवेश्वर इह
स जीवो मुक्तोऽपि प्रकृतिवशयोग्यः स्वगुणतः ॥६॥

भगवत्तत्वं समालोच्याधुना तद्विभिन्नांशरूपं जीव-स्वरूपं लक्षयति । स्फुलिङ्गा ऋद्धाग्नेरिति । सूर्य-स्थानीयस्य हरेः किरणपरमाणव एव जीवसमूहाः । ते तु ऋद्धाग्नेः समृद्धाग्नेः स्फुलिङ्गा इव । अण्वं-

शत्वात्ते च हरेः सकाशात् नित्य पृथक् । तटस्थ शक्तित्वात्तेऽपि भगवतापृथक् शक्ति शक्तिमतोरभेद न्यायात् । हरिरेव ईश्वरः प्रकृतिपतिः मायाधीशः । माया तु तस्य विधिकरीति हरेः प्रभुता । जीवस्तु स्वभावतः नित्यं बद्ध मुक्तावस्था भेदेऽपि मायावशयोग्यः इति जीवेश्वरयोः भेदो विचारितः । श्रुतयः । यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवास्मादात्मनः सर्वाणि भूतानि व्युच्चरन्ति । तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदञ्च परलोकस्थानञ्च सन्ध्यं तृतीयं स्वप्नस्थानम् । तस्मिन् सन्ध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदञ्च परलोकस्थानञ्च । तद्यथा महामत्स्य उभे कूलेऽनुसञ्चरति पूर्वञ्च परञ्चैव मेवायं पुरुष एता-वुभावन्तावनुसञ्चरति स्वप्नान्तञ्च बुद्धान्तञ्च । श्रीगीतो-पनिषद्वाक्यानि । भूमिरापोऽनलो वायुः खं मनो बुद्धि-रेव च । अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा । अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् । जीवभूतां महाबाहो ययेदं धार्यते जगत् । एतद्योनीनि भूतानि सर्वाणीत्युपधारय । अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ तत्त्वसन्दर्भे । यत्रैव यदेकं चिद्रूपं ब्रह्ममायाश्रयतावलितं विद्यामयं तत्रैव तन्माया विषय-

तापन्नप्रविद्यापरिभूतं चेत्ययुक्तमिति । जीवेश्वर-विभागोऽवगतः । ततश्च स्वरूपसामर्थ्यवैलक्षण्येन तत्-द्वितीयं मिथो विलक्षणस्वरूपमेव दृष्टमित्यागतम् । न चोपाधितारतम्यमयपरिच्छेदप्रतिविम्बत्वादि व्यवस्थया तयोर्विभागः स्यात् । तत्र यद्युपाधेरनाविद्यकत्वेन वास्तवत्व तर्ह्यविषयस्य तस्य परिच्छेद-विषयत्वा-सम्भवः । निर्द्धर्म्मकस्य व्यापकस्य निरवयवस्य प्रति-विम्बत्वायोगोऽपि उपाधिसम्बन्धाभावात् विम्बप्रति-विम्बभेदाभावात् दृश्यत्वाभावाच्च । उपाधिपरिच्छिन्ना-काशस्थ ज्योतिरंशस्यैव प्रतिविम्बो दृश्यते नत्वा-काशस्य । दृश्यत्वाभावादेव । तथा वास्तवपरिच्छेदादौ सति सामान्याधिकरण्य-ज्ञानमात्रेण तत्त्यागश्च भवेत् । तत्पदार्थप्रभावस्तत्र कारणमिति चेदस्माकमेव मतं सम्मतम् । तटस्थया रश्मिस्थानीय चिदेकात्म-शुद्धजीवरूपेणावतिष्ठते । परमात्मसन्दर्भे । एकस्य पुरुषस्य नानात्वमुपपाद्य तस्य पुनरंशा विभ्रियन्ते । तत्र द्विविधा अंशाः स्वांशा विभिन्नांशाश्च विभिन्नांशा-स्तटस्थशक्त्यात्मका जीवा इति । स्वांशास्तु गुणलीला-वतारभेदेन विविधाः । अन्यत्र च । अथ परमात्म-परिकरेषु जीवस्तस्य तटस्थलक्षणम् । प्रीतिसन्दर्भे च ।

तदेवं तस्य रश्मिपरमाणुस्थानीयांशत्वे सिद्धे तद्वत् सर्वस्यामपि दशायां कर्त्तृत्वभोक्तृत्वादि स्वरूपधर्म्मा अपि सिध्यन्ति । तद्वदेव च परमेश्वरशक्त्यनुग्रहेणैव ते कार्यक्षमा भवन्ति । तत्र प्रकृतिविकारमयकर्त्तृत्वादिकं तदीय मायाशक्तिमयानुग्रहेण । अतएव तत्सम्बन्धात् संसारः । स्वरूपशक्तिसम्बन्धान्मायान्तर्द्धाने संसारनाशः । पाद्मोत्तरे जीवस्वरूपव्याख्या । ज्ञानाश्रयो ज्ञानगुणश्चेतनः प्रकृतेः परः । न जातो निर्विकारश्च एकरूपस्वरूपभाक् । अणुर्नित्यो व्याप्तिशीलश्चिदानन्दात्मकस्तथा । अहमर्थोऽव्ययः क्षेत्री भिन्नरूपः सनातनः । अदाह्योऽच्छेद्य अक्लेद्य अशोष्योऽक्षर एव च । एवमादिगुणैर्युक्तः शेषभूतः परस्य वै । मकारेणोच्यते जीवः क्षेत्रज्ञः परवान् सदा । दासभूतो हरेरेव नान्यस्यैव कदाचनेति । तथान्यत्र । अणुमात्रोऽप्ययं जीवः स्वदेहं व्याप्य तिष्ठति । यथाव्याप्य शरीराणि हरिचन्दनविप्रुषः । श्वेताश्वतरे । बालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः स चानन्त्याय कल्प्यते । अन्यत्र श्रुतौ । एष हि द्रष्टा स्प्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुष इति । जीवस्वरूपश्च श्रूयते ।

यो विज्ञानेन तिष्ठन्निति । सुखमहमस्वाप्सं न किञ्चि-द्वेदिषमिति । अत्र जीवकर्त्तृत्वं तु परेशाधीनं तस्मात् जीवः प्रयोज्यकर्त्ता परेशस्तु हेतुकर्त्ता इति भाष्य-कृन्मतम् । जीवस्य बद्धावस्थायां दौर्बल्यात् तस्य मायापरिभूतत्वम् । मुक्तावस्थायामपि स्वगुणतः अणु-स्वभावतः तद्दौर्बल्यं स्यादेव तथापि तदवस्थायां स्वरूप-शक्तिविलास अनुग्रहतः अणोरपि जीवस्य तच्छक्ति-विशेषबलात् न मायादौरात्म्यसम्भवः । तस्मात् जीवानां तदवस्थायां अपुनरावृत्ति-लक्षणा सम्पत्ति-र्भवति । भक्तिबलरहितानां कर्म्मज्ञानाश्रितानान्तु तद-वस्थायामपि पतनशङ्का रक्षकाभावात् ॥ ६ ॥

स्वरूपार्थैर्हीनान् निजसुखपरान् कृष्णविमुखान्
हरेर्माया दण्ड्यान् गुणनिगड़जालैः कलयति ।
तथा स्थूलैर्लिङ्गै र्द्विविधवरणैः क्लेशनिकरै-
र्म्महाकर्म्मालानैर्नयति पतितान् स्वर्गनिरयौ ॥ ७ ॥

तदेवमनन्ता एव जीवाख्यास्तटस्थाः शक्तयः । तत्र तासां वर्गद्वयम् । एको वर्गोऽनादित एव भगव-दुन्मुखः । अन्यस्त्वनादित एव भगवत्पराङ्मुखः स्वभावतस्तदीयज्ञानभावात्तदीयज्ञानाभावाच्च । तत्र प्रथमोऽन्तरङ्गाशक्तिविलासानुगृहीत नित्यभगवत्परिकर-

रूपः। अपरस्तु तत्पराङ्मुखत्वदोषेण लब्धछिद्रया मायया परिभूतः संसारी इति सिद्धान्तवाक्येन बद्ध-मुक्तभेदेन जीवोऽपि द्विविधः। तत्र प्रकृतिकवलितस्य जीवस्य बद्धलक्षणं वदति स्वरूपार्थैरिति। स्वरूपार्थः स्वरूपज्ञानं स्वीय चिदेकस्वरूपज्ञानं तद्रहितान् स्वरूप-ज्ञानशून्यानित्यर्थः। निजसुखपरान् हरिभजनसुखं परित्यज्य निजेन्द्रियसुखमात्रानुसन्धानपरान् कामिनः। कृष्णविमुखान् कृष्ण एव मम सर्व्वस्व इति ज्ञानं विस्मृत्य जड़सुखभोगवाञ्छापरान्, अतएव दण्ड्यान् दण्डयोग्यान् जीवान्। हरेर्मायाशक्तिः स्वीय सत्वादि-गुणनिगड़जालैः कलयति भावयति बध्नाति इत्यर्थः। पुनश्च स्थूलं भूतमयम्। लिङ्गं मनोबुद्ध्यहङ्कारमयं आवरणम्। तेन तान् आवरयति। क्लेशनिकरैः क्लेशास्तु पाप पापवीजाविद्याभेदेन त्रिविधाः। कर्म्म-जड़मदृष्टादि-शब्द-व्यपदेश्यमनादिविनाशि च भवति। कर्म्मालानैः कर्म्म एव आलानं बन्धनस्तम्भ स्तैः। मायातु तान् पतितान् बद्धजीवान् स्वर्गनिरयौ स्वर्ग-नरकौ नयति प्रापयति। मायात्र वहिरङ्गाशक्तिः। तत्र श्रुतयः। तस्मिंश्चान्यो मायया सन्निरुद्धः। मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरम्। भगव-

त्सन्दर्भे । यद्यपीयं वहिरङ्गा तथाप्यस्यास्तटस्थशक्तिमयमपि जीवमावरितुं सामर्थ्यमस्तीति । तयेति तारतम्येन तत्कृतावरणस्य ब्रह्मादिस्थावरान्तेषु लघुगुरुभावेन वर्त्तत इति । परमात्मेत्यत्र नामाभिन्नताजनितभ्रमहानाय संग्रहश्लोकाः । मायास्यादन्तरङ्गायां वहिरङ्गा च सा स्मृता । प्रधानेऽपि क्वचित् दृष्ट्वा तद्वृत्तिर्मोहिनी च सा । आद्ये त्रये स्यात् प्रकृतिश्चिच्छक्तिस्त्वन्तरङ्गिका । शुद्धजीवेऽपि ते दृष्टे तथेशज्ञानवीर्य्ययोः । चिन्मायाशक्तिवृत्त्योस्तु विद्याशक्तिरुदीर्य्यते । चिच्छक्तिवृत्तौ मायायां योगमाया समास्मृता । प्रधानाव्याकृताव्यक्तं त्रैगुण्ये प्रकृतौ परम् । न मायायां न चिच्छक्तावित्याद्युह्यं विवेकिभिः ॥ तत्त्वसन्दर्भे । मायाया जीवमोहनकर्त्तृत्वं भगवतस्तु तत्रोदासीनत्वं मतं वक्ष्यते च विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया । विमोहिता विकत्थन्ते ममाहमिति दुर्द्धियः । अत्र विलज्जमानयेत्यनेन इदमायाति । तस्या जीवसम्मोहनं कर्म्म श्रीभगवते न रोचत इति यद्यपि सा स्वयं जानाति तथापि भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्येति दिशा जीवानामनादि भगवदज्ञानमयवैमुख्यमसहमाना स्वरूपास्फुरणमन्यरूपा-

वेशश्च करोति । श्रीभगवांश्चानादित एव भक्तायां प्रपञ्चाधिकारिण्यां तस्यां दाक्षिण्यं लङ्घितुं न शक्नोति । तथा तद्भयेनापि जीवानां स्वसाम्मुख्यं वाञ्छन्नुपदिशति । दैवी ह्येषा गुणमयी मम माया दुरत्यया । मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥ सतां प्रसङ्गान्ममवीर्यसम्विदो भवन्ति हृत्कर्णरसायनाः कथाः । तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धारतिर्भक्तिरनुक्रमिष्यति ॥ गोविन्दभाष्ये । प्रकृतिः सत्त्वादिगुणसाम्यावस्था तमोमयादि शब्दवाच्या तदीक्षणावाप्तसामर्थ्याद्विचित्रजगज्जननी । कालस्तु भूतभविष्यद्वर्त्तमान युगपच्चिरक्षिप्रादि व्यवहारहेतुः क्षणादि परार्द्धान्तश्चक्रवत्परिवर्त्तमानाः प्रलयसर्गनिमित्तभूतो जड़द्रव्यविशेष इति ॥ ७ ॥

यदा भ्रामं भ्रामं हरिरसगलद्वैष्णवजनं
कदाचित्संपश्यन् तदनुगमने स्याद्रुचियुतः ।
तदा कृष्णावृत्त्या त्यजति शनकैर्मायिकदशां
स्वरूपं बिभ्राणो विमलरसभोगं स कुरुते ॥ ८ ॥

भगवद्भक्तिभावात् प्रकृतिमुक्तानां जीवानां स्वरूपं विवक्षया बद्धजीवानां स्वस्वरूपलाभप्रक्रियामाह यदा भ्रामं भ्राममिति । यदा यस्मिन् काले कर्म्ममार्गाश्रित नानायोनिभ्रमणसमये कदाचित् सञ्चितभक्त्युन्मुखि-

सुकृतिबलेन मायाबद्ध जीवस्य हरिभक्तिरसगलितं चित्तं यस्य स एवम्भूतं वैष्णवजनं संपश्यन् तदनुगमने तच्चरित्रानुसरणे रुचिर्जायते तदा तदनुसरण-रूप कृष्णावृत्तिः स्यात् । कृष्णनामाद्यनुशीलनं स्यादित्यर्थः । माया-दूषितदशां क्रमेण त्यजति । स्वीय चित्स्वरूप-प्राप्तिरूप-मुक्तिं लब्ध्वा विमलरसभोगं प्रेमभक्त्यास्वादं स लभते ॥ श्रुतिवचनानि । समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः । जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः ॥ एवमेवैषः सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरूपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते । स उत्तमः पुरुषः । स तत्र पर्येति जक्षन् क्रीड़न् रममाणः । मुक्तानां लक्षणानि । आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः ॥ तत्र श्रीभागवतवचनानि । भवापवर्गो भ्रमतो यदा भवेत् जनस्य तर्ह्यच्युत सत्समागमः । सत्सङ्गमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिः ॥ एवा गतिरेव दुर्लभा । रजोभिः सम संख्याताः पार्थिवैरिहजन्तवः । तेषां ये केचनेहन्ते श्रेयो वै मनुजादयः । प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तम ।

मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिध्यति। मुक्तानामपि सिद्धानां नारायणपरायणः। सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने। सूत्रभाष्ये च। बलवता सत्सङ्गेन कषाय पाके विद्या भवतीत्याह, अपि स्मर्यते। पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु सम्भृतम्। पुनन्ति ते विषयविदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकमित्यादि भागवतवचनात्। श्रीभक्तिरसामृतसिन्धौ। आदौ श्रद्धा ततः साधुसङ्गोथ भजनक्रिया। ततोऽनर्थनिवृत्तिः स्यात्ततो निष्ठा रुचिस्ततः। अथासक्तिस्ततो भावस्ततः प्रेमाभ्युदञ्चति। साधकानामयं प्रेम्नः प्रादुर्भावे भवेत् क्रमः ॥ ८ ॥

हरेः शक्तेः सर्वं चिदचिदखिलं स्यात्परिणतिः
विवर्त्तं नो सत्यं श्रुतिमितिविरुद्धं कलिमलम्।
हरेर्भेदाभेदौ श्रुतिविहिततत्त्वं सुविमलं
ततः प्रेम्नः सिद्धिर्भवति नितरां नित्यविषये ॥ ९ ॥

मायावादप्रतिषेधेन सर्वं चिदचित् जगत् श्रीहरेरचिन्त्य युगपत् भेदाभेदप्रकाशं शिक्षयति हरेरिति। सर्वं चिदचित् अखिलं जगत् भगवच्छक्तेः परिणतिः परिणाम एव। यस्तु ब्रह्मविवर्त्तवादः स न सत्यम्।

सैव शब्दप्रमाणविरुद्धकलिमलमितिज्ञेयम् । सर्वं चिद्-
चित् अखिलं जगत् भगवत् शक्तेरचिन्त्य युगपत् भेदा-
भेदावेव । इदमेव सुनिर्मलवेदप्रमाणसिद्धं तत्त्वम् ।
एतेन नित्यविषये परब्रह्मणि नित्यलक्षणः प्रेमैव
सिध्यति । विवर्त्तचिन्तनादौ प्रेम्नः अनित्यत्वात्
तत्सिद्धिर्न भवतीति संक्षेपसिद्धान्तः । श्रुतिः ।
ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । गीतोप-
निषदि च । मयाततमिदं सर्वं जगदव्यक्तमूर्त्तिना ।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः । न च
मत्स्थानि भूतानि पश्य मे योगमैश्वरम् । भूतभृन्न च
भूतस्थो ममात्मा भूतभावनः ॥ भागवते च । अह-
मेवासमेवाग्रे नान्यत् यत् सदसत् परम् । पश्चादहं
यदेतच्च योऽवशिष्येत सोऽस्म्यहम् । ऋतेऽर्थं यत्
प्रतीयेत न प्रतीयेत चात्मनि । तद्विद्यादात्मनो मायां
यथाभासो यथातमः । यथा महान्ति भूतानि भूतेषू-
च्चावचेष्वनु । प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥
परमात्मसन्दर्भे । प्रादेशिकस्याप्यग्नेर्दीपादेर्दाहिकस्यापि
तद्विलक्षणाज्ज्योत्स्नाप्रभा यथा तत्प्रकाशविस्तारः ।
तथा ब्रह्मणः शक्तिकृतविस्तार इदमखिलं जगदिति ।
विचित्रशक्तिः पुरुषः पुराणो न चान्येषां शक्तयस्तादृशः

स्युः इत्यादिकं श्वेताश्वतरोपनिषदादौ । आत्मेश्वरो-ऽतर्क्य सहस्रशक्तिरित्यादिकं श्रीभागवतादिषु । आत्मनि चैवं विचित्राश्च हीति ब्रह्मसूत्रे । तत्र द्वैतान्यथाऽनुपपत्त्यापि ब्रह्मण्यज्ञानादिकं कल्पयितुं न शक्यते असम्भवादेव । ब्रह्मण्यचिन्त्यशक्तिसद्भावस्य युक्तिलब्धत्वात् श्रुतत्वाच्च द्वैतान्यथानुपपत्तिश्च दूरे गता । ततश्चाचिन्त्यशक्तिरेव द्वैतोपपत्तौ कारणं पर्यवस्यति । तस्मान्निर्विकारादि स्वभावेन सतोऽपि परमात्मनोऽचिन्त्यशक्त्यादिना परिणामादिकं भवति । चिन्तामण्ययस्कान्तादीनां सर्वार्थप्रसवलोहचालनादिवत् । तदेतदङ्गीकृतं श्रीबादरायणेन श्रुतेश्च शब्दमूलत्वादिति । ततस्तस्य तादृशशक्तित्वात् प्राकृतवन्मायाशब्दश्चेन्द्रजालविद्यावाचित्वमपि न युक्तम् । किन्तु मीयते विचित्रं निर्म्मीयतेऽनयेति विचित्रार्थकरशक्तिवाचित्वमेव । तस्मात् परमात्मशक्तिपरिणाम एव शास्त्रसिद्धान्तः । तत्र चापरिणतस्यैव सतोऽचिन्त्यया शक्त्या परिणाम इत्यसौ सन्मात्रतावभासमानस्वरूपव्यूहरूप द्रव्याख्य शक्तिरूपेणैव परिणमते न तु स्वरूपेणेति गम्यते यथैव चिन्तामणिः ॥ क्वचिदस्य ब्रह्मोपादानत्वं क्वचित् प्रधानोपादानत्वं श्रूयते । तत्र सा मायाख्या

परिणामशक्तिश्च द्विविधा वर्ण्यते । निमित्तांशो माया उपादानांशः प्रधानमिति । तत्र केवला शक्तिर्निमित्तम् । तद्व्यूहमयी तूपादानमिति विवेकः । अतएव श्रुतावपि विज्ञानं चाविज्ञानञ्चेति कस्यचिद्विभागस्याचेतनता श्रूयते ॥ ९ ॥

श्रुतिः कृष्णाख्यानं स्मरणनतिपूजाविधिगणा-
स्तथा दास्यं सख्यं परिचरणमप्यात्मदनम् ।
नवाङ्गानि श्रद्धा-पवितहृदयः साधयति वा
व्रजे सेवालुब्धो विमलरसभावं स लभते ॥ १० ॥

एतावत् सम्बन्धज्ञानमालोच्याभिधेयतत्त्वं वदति । अभिधेयं भगवद्भुमुख्यविरोधन्यायात् तत्साम्मुख्यमेव । तच्च तदुपासनलक्षणं भक्तिरेवाभिधेयं वस्तु । अन्याभिलाषिताशून्यं ज्ञानकर्म्माद्यनावृतम् । आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा इति लक्षणेन शुद्धा भक्तिर्लक्षिता श्रीरूपेण । क्लेशघ्नी शुभदा मोक्षलघुताकृत् सुदुर्लभा । सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षणी च सा । अग्रतो वक्ष्यमानायास्त्रिधा भक्तेरनुक्रमात् । द्विशः षड्भिः पदैरेतन्माहात्म्यं परिकीर्त्तितमिति तन्माहात्म्यं सूचितं तेनैव । ग्रन्थेऽस्मिन् तदङ्गानि विव्रियन्ते श्रुतिरिति । श्रुतिरित्यादि नवाङ्गानि यः साधयति

स विमलरसभावं लभते। तत्र साधनभक्तेर्लक्षणं क्रियते रूपेण। कृतिसाध्या भवेत् साध्यभावा सा साधनाभिधा। नित्यसिद्धस्य भावस्य प्राकट्यं हृदि साध्यता॥ तत्साधनमपि द्विविधं वैधीभक्तिसाधनं रागानुगाभक्तिसाधनञ्च। साधु-शास्त्रवाक्ये श्रद्धामूलं यत् साधनं तत् वैधीभक्तिसाधनम्। यत्र रागानवाप्तत्वात् प्रवृत्तिरुपजायते। शासनेनैव शास्त्रस्य सा वैधीभक्तिरुच्यत इति वैधीभक्तिलक्षणं श्रीहरिभक्तिरसामृतसिन्धौ दृश्यते। सा श्रद्धा तु आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम्। रक्षिष्यतीति विश्वासो गोप्तृत्वे वरणं तथा। आत्मनिक्षेप-कार्पण्ये षड्विधा शरणागतिरिति लक्षणेन लक्षिता। व्रजजनसेवालोभमूलं यत् साधनं तदेव रागानुगा भक्तिसाधनम्। शेषोक्तमेव प्रबलं झटिति फलप्रदञ्च। ज्ञानकर्म्मादीनां नाभिधेयत्वं मुक्तिभुक्तिफलसाधकत्वात् प्रेमसाधनायोग्यत्वाच्च। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो निदिध्यासितव्य इत्यादि वेदवचनप्रमाणानि बहवः सन्ति। कर्म्मज्ञानादीनां न साक्षादभिधेयत्वम्। श्रुतौ नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैषवृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं

स्वाम् । भागवते । तथापि ते देव पदाम्बुजद्वयप्रसाद-लेशानुगृहीत एवहि । जानाति तत्त्वं भगवन्महिम्नो न चान्य एकोपि चिरं विचिन्वन् । अतः सुकृतिबलेन साधुसङ्गलाभानन्तरं या शरणापत्ति लक्षणा श्रद्धा उदयति तया श्रवणं कीर्त्तनं विष्णोः स्मरणं पाद-सेवनम् । अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवेदनमिति भक्तेर्नवाङ्गानि लक्षितानि । तत्र श्रुतिः श्रवणम् । स च श्रीकृष्णनामरूपगुणलीलामयशब्दानां श्रोत्रस्पर्शः । महज्जनोच्चारितनामादेः श्रवणस्य विशेषमाहात्म्यम् । भगवन्नामरूपगुणलीलामयशब्दानां जिह्वास्पर्श एव कीर्त्तनम् । कृष्णनामरूपगुणलीलास्मृतिरेव स्मरणम् । तच्च स्मरण, धारणा, ध्यानानुस्मृतिसमाधिभेदात् पञ्च-विधम् । यत्किञ्चित् अनुसन्धानं स्मरणम् । पूर्व-चिन्तितविषयात् समाकृष्य साम्याकारेण मनोधारणमेव धारणा । विशेषरूपेण रूपादिचिन्तनं ध्यानम् । अमृतधारावत् अनवच्छिन्नं तदध्रुवानुस्मृतिः । ध्येय-मात्रस्फुरणं समाधिः । पादसेवनं परिचर्या तत्र स्वस्मिन्न-किञ्चनत्व सेवायोग्यत्वबुद्धिः तथा सेव्यवस्तुनि सच्चिदानन्दघनत्वबुद्धिश्च कार्या । श्रीमूर्त्तिदर्शनस्पर्शन-परिक्रमानुव्रजनतुलसीवैष्णवसेवन भगवन्मन्दिरगङ्गा-

द्वारकादितीर्थदर्शनादयोऽप्यन्तर्भाव्या । अर्च्चनं तदागमोक्तावाहनादि क्रमकम् । ये तु सम्पत्तिमन्तो गृहस्थास्तेषां त्वर्चनमार्ग एव मुख्यः । आवाहनक्रमो यथा । आवाहनं चादरेण सम्मुखीकरणं प्रभोः । भक्त्या निवेषणं तस्य संस्थापनमुदाहृतम् । तवास्मीति तदीयत्वदर्शनं सन्निधापनम् । क्रियासमाप्तिपर्यन्तस्थापनं सन्निरोधनम् । सकलीकरणं प्रोक्तं तत् सर्व्वाङ्गप्रकाशनम् । निवेद्यार्पण वैष्णवचिह्नानि निर्म्माल्यधारणचरणामृतपानादीनि अर्चनाङ्गानि । भगवज्जन्मदिन कार्त्तिकव्रतैकादशीव्रतमाघस्नानादिकं अत्रैवान्तर्भाव्यम् । वन्दनमेव नमस्कारः । नमस्कारे एकहस्तकृतत्व वस्त्रावृतदेहत्व भगवदग्रपृष्ठवामभागात्यन्तनिकटगर्भमन्दिरगतत्वादिमया अपराधाः परिहर्त्तव्याः । दास्यं तच्च श्रीकृष्णस्य दासम्मन्यत्वम् । नमः स्तुतिसर्व्वकर्म्मार्पणपरिचर्य्याचरणस्मृतिकथाश्रवणात्मकं दास्यमिति सिद्धान्तितम् । स्तुतिर्विज्ञप्तिः । सा च संप्रार्थनामयी, दैन्यबोधिका लालसामयी भेदेन त्रिविधा । सख्यम् । तच्च हिताशंसनमयं बन्धुभावलक्षणम् । आत्मनिवेदनम् । तच्च देहादिशुद्धात्मपर्यन्तस्य सर्वतोभावेन तस्मिन्नेवार्पणम् । तत् कार्य्यं चात्मार्थचेष्टा-

शून्यत्वं तन्यस्तात्मसाधनसाध्यत्वम् । तदर्थचेष्टामयत्वञ्च । श्रीहरिभक्तिरसामृतसिन्धौ भक्तिसम्बन्धे यान्यानि वाक्यानि कथितानि तानि यथा । भुक्तिमुक्तिस्पृहा यावत् पिशाची हृदि वर्त्तते । तावत् भक्तिसुखस्यात्र कथमभ्युदयो भवेत् ॥ अत्रत्याऽयतयैवोक्ता मुक्तिः, पञ्चविधापि चेत् । सालोक्यादिस्तथाप्यत्र भक्त्यानातिविरुध्यते ॥ सुखैश्वर्योत्तरा सेयं प्रेमसेवोत्तरेत्यपि । सालोक्यादिर्द्विधा तत्र नाद्यासेवा जुषां मता ॥ किन्तु प्रेमैकमाधुर्यभुज एकान्तिनो हरौ । नैवाङ्गीकुर्वते जातु मुक्तिं पञ्चविधामपि ॥ तत्राप्येकान्तिनां श्रेष्ठा गोविन्द हृतमानसाः । येषां श्रीशप्रसादोऽपि मनो हर्त्तुं न शक्नुयात् ॥ सिद्धान्ततस्त्वभेदेऽपि श्रीशकृष्णस्वरूपयोः । रसेनोत्कृष्यते कृष्णरूपमेषा रसस्थितिः ॥ शास्त्रतः श्रूयते भक्तौ नृमात्रस्याधिकारिता । निषिद्धाचारतो दैवात् प्रायश्चित्तन्तु नोचितम् ॥ तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमम् । शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयम् ॥ समृग्यः श्रेयसां हेतुः पन्थाः सन्तापवर्जितः । अनवाप्तश्रमं पूर्वं येन सन्तः प्रतस्थिरे ॥ अचिरादेव सर्वार्थः सिद्धस्तेषामभीप्सितः । सद्धर्म्मस्यावबोधाय येषां निर्बन्धिनी-

मतिः ॥ यावता स्यात् स्वनिर्वाहः स्वीकुर्यात् ताव-
दर्थवित् । आधिक्ये न्यूनतायाञ्च च्यवते परमार्थतः ॥
अलब्धे वा विनष्टे वा भक्ष्याच्छादनसाधने । अविक्लव-
मतिर्भूत्वा हरिमेवधिया स्मरेत् ॥ शोकामर्षादिभि-
र्भावैराक्रान्तं यस्य मानसम् । कथं तत्र मुकुन्दस्य
स्फुर्त्तिसम्भावना भवेत् ॥ पितेव पुत्रं करुणो नोद्वे-
जयति यो जनम् । विशुद्धस्य हृषीकेशस्तूर्णं तस्य
प्रसीदति ॥ यावन्ति भगवद्भक्तेरङ्गानि कथितानि ह ।
प्रायस्तावन्ति तद्भक्तभक्तेरपि बुधा विदुः ॥ केषाञ्चित्
क्वचिदङ्गानां यत् क्षुद्रं श्रूयते फलम् । वहिर्मुख
प्रवृत्त्यैतत् किन्तु मुख्य फलं रतिः ॥ सम्मतं भक्ति-
विज्ञानां भक्त्यङ्गत्वं न कर्म्मणाम् । ज्ञानवैराग्ययो-
र्भक्तिप्रवेशायोपयोगिता ॥ ईषत्प्रथममेवेति नाङ्गत्व-
मुचितं तयोः । यदुभे चित्तकाठिन्य हेतुप्राये सतां
मते ॥ सुकुमारस्वभावेयं भक्तिस्तद्धेतुरीरिता । किन्तु
ज्ञानविरक्त्यादि साध्यं भक्त्यैव सिध्यति ॥ रुचि-
मुद्वहतस्तत्र जनस्य भजने हरेः । विषयेषु गरिष्ठोपि
रागः प्रायो विलीयते ॥ अनासक्तस्य विषयान् यथार्ह-
मुपयुञ्जतः । निर्बन्धः कृष्णसम्बन्धे युक्तं वैराग्यमुच्यते ॥
प्रापञ्चिकतया बुद्ध्या हरिसम्बन्धि वस्तुनः । मुमुक्षुभिः

परित्यागो वैराग्यं फल्गु कथ्यते ॥ धनशिष्यादिभिर्द्वारैर्या भक्तिरुपपद्यते । विदूरत्वादुत्तमताहान्या तस्याश्च नाङ्गता ॥ कृष्णोन्मुखं स्वयं यान्ति यमाः शौचादयस्तथा । इत्येषाञ्च न युक्ता स्याद्भक्त्यङ्गान्तरपातिता ॥ साभक्तिरेक मुख्याङ्गाश्रितानेकाङ्गिकाथवा । स्ववासनानुसारेण निष्ठातः सिद्धिकृद्भवेत् ॥ अथ रागानुगा भक्तिसाधनं श्रीरूपगोस्वामिना विवृतं विराजन्तीमभिव्यक्तं व्रजवासिजनादिषु । रागात्मिकामनुसृता या सा रागानुगोच्यते ॥ रागानुगा विवेकार्थमादौ रागात्मिकोच्यते ॥ इष्टे स्वारसिकी रागः परमाविष्टता भवेत् । तन्मयी या भवेद्भक्तिः सात्र रागात्मिकोच्यते ॥ सा कामरूपा सम्बन्धरूपा चेति भवेद्द्विधा ॥ कामाद्गोप्यो भयात् कंसो द्वेषाच्चैद्यादयो नृपाः । सम्बन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो ! आनुकूल्य विपर्यास्याद्भीतिद्वेषौ पराहतौ । स्नेहस्य सख्यवाचित्वाद्वैधभक्त्यनुवर्त्तिता ॥ किम्वा प्रेमाभिधायित्वान्नोपयोगोऽत्र साधने । भक्त्यावयमिति व्यक्तं वैधी भक्तिर्रुदीरिता ॥ यदरीणां प्रियाणाञ्च प्राप्यमेकमित्रोदितम् । तद्ब्रह्मकृष्णयोरैक्यात् किरणार्कोपमायुषोः ॥ ब्रह्मण्येव लयं यान्ति प्रायेण रिपवो

हरेः । केचित्प्राप्यापि सारूप्याभासं मज्जन्ति तत् सुखे ॥ सा कामरूपा सम्भोगतृष्णां या नयति स्वताम् । यदस्यां कृष्णसौख्यार्थमेव केवलमुद्यमः ॥ इयन्तु व्रजदेवीषु सुप्रसिद्धा विराजते। आसां प्रेम विशेषोयं प्राप्तः कामपि माधुरीम् । तत्तत्क्रीड़ानिदानत्वात् काम इत्युच्यते बुधैः ॥ सम्बन्धरूपा गोविन्दे पितृत्वाद्यभिमानिता । अत्रोपलक्षणतया वृष्णीणां वल्लभा मताः । यदैश्यज्ञानशून्यत्वादेषां रागे प्रधानता ॥ रागात्मिकाया द्वैविध्याद्द्विधारागानुगा च सा । कामानुगा च सम्बन्धानुगा चेति निगद्यते ॥ रागात्मिकैक निष्ठा ये व्रजवासिजनादयः। तेषां भावाप्तये लुब्धो भवेदत्राधिकारवान् तत्तद्भावादिमाधुर्ये श्रुतेधीर्यदपेक्षते। नात्र शास्त्रं न युक्तिश्च तल्लोभोत्पत्तिलक्षणम् ॥ वैधभक्त्यधिकारी तु भावाविर्भावनावधिः । अत्र शास्त्रं तथा तर्कमनुकूलमपेक्षते ॥ कृष्णं स्मरन् जनश्चास्य प्रेष्ठं निजसमीहितम् । तत्तत् कथा रतश्चासौ कुर्याद्वासं व्रजे सदा ॥ सेवासाधकरूपेण सिद्धरूपेण चात्र हि। तद्भावलिप्सुना कार्या व्रजलोकानुसारतः॥ श्रवणोत्कीर्त्तनादीनि वैधभक्त्युदितानि तु। यान्यङ्गानि च तान्यत्र विज्ञेयानि मनीषिभिः ॥ रिरंसां सुष्ठु कुर्वन् यो विधि-

मार्गेण सेवते । केवलेनैव स तदा महिषीत्वमियात् पुरे ॥ सा सम्बन्धानुगा भक्तिः प्रोच्यते सद्भिरात्मनि । या पितृत्वादि सम्बन्ध मननारोपणात्मिका । लुब्धैर्वात्सल्य सख्यादौ भक्तिः कार्यात्र साधकैः । व्रजेन्द्र सुवलादीनां भाव चेष्टितमुद्रया ॥ अत्र श्रीजीवः । पितृत्वाद्यभिमानो हि द्विधा सम्भवति स्वतन्त्रत्वेन तत् पित्रादिभिरभेदभावनया च । अत्रान्त्यमनुचितं भगवद्भेदोपासनावत् तेषु भगवद्वदेवनित्यत्वेन प्रतिपादयिष्यमाणेषु तदनौचित्यात् । तथा तत्परिकरेषु तदुचितभावनाविशेषेण अपराधापातात् ॥ पुनः श्रीरूपः । कृष्णतद्भक्तकारुण्यमात्रलाभैक हेतुका । पुष्टिमार्गतया कैश्चिदियं रागानुगोच्यते ॥ वैधीभक्तिस्तु कैश्चित् मर्यादामार्ग इत्युच्यते ॥ १० ॥

स्वरूपावस्थाने मधुररसभावोदय इह
व्रजे राधाकृष्ण स्वजनजनभावं हृदि बहन् ।
परानन्दे प्रीतिं जगदतुल सम्पत्सुखमहो
विलासाख्ये तत्त्वे परमपरिचर्यां स लभते ॥११॥

तदा कृष्णावृत्त्या त्यजति शनकैर्मायिकदशामित्यादि वाक्यप्रयोगेन श्रवणकीर्त्तनादिसाधनभक्त्यनुशीलनेन किं भवतीति पूर्वपक्षमाशङ्क्यप्रयोजनतत्त्वमाह

स्वरूपावस्थान इति। मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः इति भागवतवचनानुसारेण जीवानां स्वरूपावस्थानमेव मुक्तिरित्यायाति । अहं शुद्धचित्कणः कृष्णानुगततत्त्वविशेषः । जगत्सम्भोगादि कार्य्यं मम पतनमेव । कृष्णचरणामृतसेवासुखमेव ममैव गतिरितिविचिन्त्य कृष्णचरणपीयूषपानतत्परः सन् सजीवः शान्तदास्यसख्यवात्सल्यमधुररसानां मध्ये अधिकारिभेदेन मधुररस एव मुख्योत्तम इति भावनया तद्रसमास्वादयति । सुतरां स्वरूपावस्थानसमये मधुररसभावोदयो हि परमप्रयोजनलाभः । तत्प्राप्त्या । व्रजे चिज्जगति । राधाकृष्णस्वजनजनभावं राधाकृष्णयो र्ये स्वजनाः परिकरजनाः तेषां जनः कैङ्कर्य्यरतस्तस्य भावं सेवादि कार्यविषयक स्वभावं स्वस्य हृदि बहन् गृह्णन् । परानन्दे सच्चिदानन्दे कृष्णविषये प्रीतिम् । जगदतुलसम्पत्सुखं जगति यदतुलसम्पत्सुखं तत् । पुनः राधाकृष्णविलासाख्ये तत्त्वे परमपरिचर्यां दास्यं लभते । सिद्धान्तवाक्यानि यथा । भगवत्प्रीतिरूपा वृत्तिर्मायादिमयी न भवति किन्तु स्वरूपशक्त्यानन्दसाररूपा । प्रीतिः खलु भक्तचित्तमुल्लासयति, ममतया योजयति, विस्रम्भयति, प्रियत्वातिशयेनाभिमानयति, द्रावयति,

स्वविषयं प्रत्यभिलाषातिशयेन योजयति, प्रतिक्षणमेव स्वविषयं नवनवत्वेनानुभावयति, असमोर्द्ध चमत्कारेण उन्मादयति च । सा च प्रीतिरूपा भक्तिक्रमेण पाल्यानां आश्रयात्मिका । भृत्यानां दास्यात्मिका । लाल्यानां प्रणयात्मिका च ज्ञेया । कुत्रोयमिति भावेन अनुकम्पित्वाभिमानमयी प्रीतिर्वात्सल्यम् । मत् सम मधुरशीलवान् यो निरुपाधिमत्प्रणयाश्रयविषय इति भावेन मित्रत्वाभिमानमयी प्रीतिर्मैत्र्याख्या द्विविधा । परस्परनिरुपाधिकोपकाररसिकतामया सुहृदाख्या । सहविहारशाली प्रणयमयी सख्याख्याचेति । अथ कान्तोऽयमिति प्रीतिः कान्तभावः । एष एव प्रियता-शब्देन श्रीरसामृतसिन्धौ परिभाषितः । प्रियस्य भावः प्रियतेति । लौकिकरसिकैरत्रैव रतिसंज्ञास्वीक्रियते । एष एव तत्तुल्यत्वात् श्रीगोपिकासु कामादिशब्देनाप्य-भिहितः । स्मराख्यः कामविशेषस्त्वन्यः वैलक्षण्यात् । कामसामान्यं खलुस्पृहा सामान्यात्मकम् । प्रीति-सामान्यस्तु विषयानुकूल्यात्मकस्तदनुगतविषयस्पृहादि-मयो ज्ञानविशेष इति लक्षितम् । अतो द्वयोः समान-प्रायचेष्टत्वेऽपि कामसामान्यस्य चेष्टा स्वीयानुकूल्य-तात्पर्या । पुरुषप्रयोजनं तावत्सुखप्राप्तिः दुःखनिवृत्तिश्च ।

श्रीभगवत्प्रीतौ तु सुखप्राप्तित्वं दुःखनिवृत्तित्वञ्चात्यन्तिकमिति । तथा श्रुतिः । येनाहं नामृतः स्यां किमहं तेन कुर्य्यामिति । रसं ह्येवायं लब्ध्वानन्दी भवतीति । आनन्दं ब्रह्मणो विद्वान्नबिभेति कुतश्चनेति । तस्मात् प्रीतिरेव पुरुषप्रयोजनत्वेन सर्वदा अन्वेष्टव्या । अत्र एतावदेव वक्तव्यम् । एतद्रहस्यं श्रीगुरुचरणाश्रयेणात्मनि ज्ञातव्यं चिदनुशीलनप्रक्रियया ॥ ११ ॥

प्रभुः कः को जीवः कथमिदमचिद्विश्वमिति वा
विचार्य्यैतानर्थान् हरिभजनकृच्छास्त्रचतुरः ।
अभेदाशां धर्म्मान् सकलमपराधं परिहरन्
हरेर्नामानन्दं पिबतिहरिदासो हरिजनैः ॥ १२ ॥

पूर्वोक्तदशश्लोकेन सम्बन्धाभिधेयप्रयोजनं विशदयन् जीवकर्त्तव्यता प्रदर्शिता प्रभुः क इति । जीवानां कः प्रभुः । कोऽसौ जीवः । इदं चिदचिद्विश्वं कथं वा । सम्बन्धाभिधेयप्रयोजनमूलकं एतदर्थत्रयं विचार्य्यं । य एव शास्त्रार्थचतुरः स हरिभजनपरो भवति । स च हरिदासाभिमानेन भक्तजनसङ्गेन च हरेर्नामानन्दं पिबति आनन्दस्य रसरूपत्वात् पानसम्बन्धः सङ्गच्छते । तत्त्वमस्यादि-ज्ञानं अष्टाङ्ग-योगादिसाधनं परित्यज्य कथं बुद्धिमतां हरिनामकीर्त्तनादौ स्पृहा भवेदित्याद्या-

शङ्क्य नामानन्दपानं व्यवस्थाप्यते? उच्यते। श्रुतौ। ॐ आऽस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे। ॐ तत्सदित्यादि। हे विष्णो ते तव नाम चित् चित्स्वरूपं अतएव महः स्वप्रकाशरूपम्। तस्मात् अस्य नाम्न आ ईषदपि जानन्तः न तु सम्यक् उच्चार माहात्म्यादि पुरस्कारेण। तथापि विवक्तन ब्रुवानाः केवलं तदक्षराभ्यासमात्रं कुर्वाणाः सुमतिं तद्विषयां विद्यां भजामहे प्राप्नुमः। यतस्तदेव प्रणव-व्यञ्जितं वस्तु सत् स्वतःसिद्धमिति। अतएव भय-द्वेषादौ श्रीमूर्त्तेः स्फुर्त्तेरिव साङ्केत्यादवश्य मुक्तिदत्वं श्रूयते। पाद्मे। नामचिन्तामणिः कृष्णश्चैतन्य रस-विग्रहः। पूर्णः शुद्धोनित्यमुक्तोऽभिन्नत्वान्नामनामिनो-रिति। नामाभासस्य मुक्ति दत्वं श्रूयते, किन्तु तस्य प्रेमदत्वं न श्रूयते इति नाम रहस्यम्। नामापराध-शून्यानां शुद्ध नाममात्रानुशीलनात् नाम्नः प्रेमदत्वं उक्तम्। नामापराधास्त्वेते पाद्मोक्ताः। १। सतां निन्दा, नामपराणां साधूनां अश्रेष्ठता स्थापनरूपा निन्दा। २। शिवस्य श्रीविष्णोर्नामादेः स्वातन्त्र्य-मननम्। भगवतो नामरूपगुणलीलादौ जड़बुद्ध्या भगवतस्तेषां पृथग्ज्ञानम्। अथवा श्रीशिवः श्रीविष्णोः

सकाशात् पृथक् शक्तिसिद्ध ईश्वर इति मननं शिवादे-र्विष्णोरवतारत्वात् । ३ । गुर्ववज्ञा । नामतत्त्वगुरूणां ब्रह्मज्ञानादिशिक्षा गुर्वपेक्षाहीनमननम् । ४ । श्रुति-तदनुगतशास्त्रनिन्दनम् । तत्तच्छास्त्रे नाम माहात्म्यं दृष्ट्वा तत्तन्निन्दनम् । ५ । हरिनाममहिम्नि अर्थवादो-ऽयमिति मननम् । ६ । हरेर्नामानि कल्पितानि इति चिन्तनम् । नामनामिनोरभेदत्वात्तद्विश्वास एव अपराधः । ७ । नामबलेन पापाचरणम् । नाम्नः ग्रहणात् प्राक् यद्यत् पापं कृतं तत्सर्वं नामग्रहणेन विध्वंसितं भवति । ततो न पापप्रवृत्तिः । क्षिप्रं भवति धर्म्मात्मा इति गीतावचनात् पूर्वपापसम्बन्धोऽपि अत्यल्पकालेन नामपूतस्वभावेन पराजितो भवति । किन्तु ये तु नामबलेन पुनः पापाचरणं कुर्वन्ति ते किल नामापराधिनः । ८ । अन्य शुभ क्रियाभिर्नाम सामान्यमननम् । नाम्नः चिन्तामणित्वात् स्वरूपा-भिन्नत्वाच्च साक्षात् कृष्णस्वरूपत्वे सिद्धे रन्यज्ञानकर्म्म-योगतीर्थयात्रादिशुभक्रिया तत्समा न भवति । ये तु अन्यपुण्यकर्म्मणा सह नाम्नः सामान्यं पश्यन्ति तेत्वप-राधिनः । ९ । अश्रद्दधानादौ नामोपदेशः । श्रद्धया विना नाम्नि नाधिकारः अश्रद्दधाने स्वप्रतिष्ठादि स्वार्थ-

लाभार्थं यः नामोपदेशः स एव अपराधः । १० । अहं ममेत्यभिमानेन सहित नामग्रहणम् । अहं धनी, अहं अत्युच्चवर्णी, अहं वैष्णवः सुतरां पूजनीय, अहं ज्ञानीत्यादि मिथ्याभिमानदूषितचित्तानां भगवन्नाम ग्रहणं कैतवम् । अतएवापराधः । श्रीमन्महाप्रभुणा श्रीशिक्षाष्टके यदुदितं तृणादपि सुनीचेन तरोरपि सहिष्णुना । अमानिना मानदेन कीर्त्तनीयः सदा हरिरिति तदपि सङ्गमनीयं दशमापराध-परिहारे तृणादपि वाक्यतात्पर्यम् । सप्तमापराध-परिहारे तरोरपि सहिष्णुनेत्यादि वाक्यतात्पर्यम् । तितिक्षात्र पापदमनतात्पर्यका । अमानीति वाक्येन नवमः अपराधः परिहृतः । मानदशब्देनान्यः सप्तसंख्यकापराधः परिहरणीयः । नाम परायणस्य साधोः, नाम नामिनोरभेदज्ञानस्य, नामतत्त्वदेशिकस्य, नामतत्त्वप्रकाशकशास्त्रस्य, नाममाहात्म्यं सत्यमिति स्थापकस्य, नाम एव अप्राकृतवस्तु न तु कल्पितमिति निर्णायकस्य, नाम एव सर्वसत्क्रिया विलक्षणरूपेण श्रेष्ठमिति सिद्धान्तस्य सम्मानकरणं मानदत्वम् । ईश्वरे तदधीनेषु वालिशेषु द्विषत्सु च । प्रेममैत्री कृपोपेक्षा यः करोति स मध्यम इति भागवतवचनानुसारेण कृष्णे प्रेमाचरणं तद्भक्तेषु

मैत्र्याचरणं चिदचिद्ज्ञानहीनेषु विषयमुग्धेषु कृपाचरणं, द्विषत्सु मायावाद-नास्तिकवाद-दूषितभगवत्स्वरूप-विद्वेषिषु जीवस्य नित्यकृष्णदास्यज्ञानविद्वेषिषु च उपेक्षाचरणमेव यथायोग्यं सर्वत्र मानप्रदानमेवेत्युपदिष्टम् । एतान् अपराधान्, परिहरन् । धर्म्मान्, प्रेमेतरफलप्रदान् सर्वप्रकारवेदोक्तानपि धर्म्मान् सर्वधर्म्मान् परित्यज्येत्यादि गीतावाक्यात् परिहरन् । अभेदाशां मुक्तिस्पृहाम् । सालोक्य-सार्ष्टि-सामीप्य-सारूप्य-सायुज्यभेदेन मुक्तिरपि पञ्चविधाः । तत्र सायुज्यमुक्तेर्भक्तिविरोधात् तन्न्यक्कृतम् । भगवत्सेवाद्वारभूतं सालोक्यादि चतुष्टयमपि न स्पृहनीयं तत्तत्फलानामनिवार्यकत्वात् श्रीकृष्णकृपया भक्तिसाधकानां तत्तत् स्पृहायाभक्तिबाधकत्वाच्च ॥ १२ ॥

संसेव्य दशमूलं वै हित्वाऽविद्यामयं जनः ।
भावपुष्टिं तथा तुष्टिं लभते साधुसङ्गतः ॥ १३ ॥

एतद्दशमूलसेवनफलमाह संसेव्य दशमूलमिति । यथा लोके दशमूलपाचनं सेवित्वा ज्वररूपमामयं दूरीकरोति तथेदमप्राकृतदशमूलसेवनेन सुकृतस्य जनस्य स्वरूपज्ञानात् अविद्यारूप आमयः नश्यति । जीवस्वभावो यो हरौ भावस्तस्य पुष्टिर्भवति । इतरतत्त्वे

वैराग्यरूपा तुष्टिश्च जायते । प्रकारान्तरेण भागवते ।
भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः ।
प्रपद्यमानस्य यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनु-
घासम् । अर्थश्चायम् । प्रपद्यमानस्य हरिं भजतः पुंसः
भक्तिः प्रेमलक्षणा परेशानुभवः प्रेमास्पदभगवद्रूप-
स्फुर्त्तिः तयोर्निर्वृतस्य ततोऽन्यत्र गृहादिषु विरक्तिः
इत्येष त्रिकः एककालः भजनसमकाल एव स्यात्
यथाश्नतो भुञ्जानस्य तुष्टिः सुखं पुष्टिरुदरभरणं क्षुन्निवृत्ति-
श्चानुग्रासं स्युः । भक्त्यादीनां तु तुष्ट्यादयः क्रमेणैव
दृष्टान्ता ज्ञेयाः । उत्तरत्राप्येतत् क्रमेणैव । भक्ति-
तुष्ट्योः सुखैकरूपत्वात् । पुष्ट्यनुभवयोरात्मभरणैक-
रूपत्वात् । क्षुदपायविरक्त्योः शान्त्येकरूपत्वात् ।
यद्यपि भुक्तवतः अन्नेपि वैतृष्ण्यं जायते भगवदनुभवि-
नस्तु विषयान्तर एवेति वैधर्म्यं तथापि वस्त्वन्तर-
वैतृष्ण्यांश एवात्र दृष्टान्तो गम्यते ॥ १३ ॥

इतिप्रायां शिक्षां चरणमधुपेभ्यः परिदिशन्
गलन्नेत्राम्भोभिः स्नपितनिजदीर्घोज्ज्वलवपुः ।
परानन्दाकारो जगदतुलबन्धुर्यतिवरः
शचीसूनुः शश्वत् स्मरणपदवीं गच्छतु स मे ॥१४॥

इति प्रायामिति । इतिप्रायां एवम्भूतां शिक्षां

चरणमधुपेभ्यः भक्तेभ्यः परिदिशन् कथयन् गलन्-नेत्राम्भोभिः स्रवदश्रुभिः स्नपितं आर्द्रीकृतं निजं स्वकीयं दीर्घं उज्ज्वलं वपुर्यस्य सः तथा परानन्दाकारः आनन्दमयमूर्त्तिः जगदतुलबन्धुः भुवनैकबन्धुः यतिवरः यतिश्रेष्ठः स शचीसूनुः शश्वत् सदा मे मम स्मरणपदवीं स्मृतिपथं गच्छतु प्राप्नोतु । वृत्तं शिखरिणी ॥ १४ ॥

गतिर्गौड़ीयानामपिसकलवर्णाश्रमजुषां
तथा चौढ्रीयानामतिसरलदैन्याश्रितहृदाम् ।
पुनः पाश्चात्यानां सदयमनसां तत्त्वसुधियां
शचीसूनुः शश्वत् स्मरणपदवीं गच्छतु स मे ॥१५॥

गतिरिति । सकलाश्च ते वर्णाश्रमाश्च सकल-वर्णाश्रमाः तान् जुषते सकलवर्णाश्रमजुषः तेषां गौड़ीयानां गौड़देशवासिनां तथा दैन्यं दीनतां आश्रितं दैन्याश्रितं (द्वया आश्रिताद्यैः स इति द्वितीयासमासः) अति सरलं दैन्याश्रितं हृत् हृदयं येषां तेषां औढ्रीयानां ओढ्रदेशवासिनां, पुनः तथा सदयमनसां सदयचित्तानां तत्त्वज्ञानिनां पाश्चात्यानां आर्याणां गतिः आश्रयः स शचीसूनुः मे मम शश्वत् सदा स्मरणपदवीं स्मृतिपथं गच्छतु प्राप्नोतु । वृत्तं पूर्ववत् ॥ १५ ॥